# Uddhava Gita

## from the Bhagavata Purana

### Chapter 11

Translation by Swami Tadatmananda, Arsha Bodha Center

उद्धव उवाच
**Uddhava said,**
**uddhava uvāca**

त्वं ब्रह्म परमं साक्षाद्
**You are supreme brahman itself,**
**tvaṃ brahma paramaṃ sākṣād**

अनाद्यन्तमपावृतम् ।
**without beginning, end or limit.**
**anādyantam apāvṛtam**

सर्वेषामपि भावानां
**For all beings, You are the source of**
**sarveṣām api bhāvānāṃ**

त्राणस्थित्यप्ययोद्भवः ॥१॥
**protection, sustenance, death and birth.**
**trāṇa-sthity-apyayodbhavaḥ**

उच्चावचेषु भूतेषु
**In all beings, high and low,**
**uccāvaceṣu bhūteṣu**

दुर्ज्ञेयमकृतात्मभिः ।
**though difficult for the ignorant to perceive,**
**durjñeyam akṛtātmabhiḥ**

उपासते त्वां भगवन्
**You, O Lord, are worshiped by**
**upāsate tvāṃ bhagavan**

याथातथ्येन ब्राह्मणाः ॥२॥
**the wise as You truly are.**
**yāthā-tathyena brāhmaṇāḥ**

येषु येषु च भावेषु
In which beings do the
yeṣu yeṣu ca bhāveṣu

भक्त्या त्वां परमर्षयः ।
great sages worship You with devotion
bhaktyā tvāṃ parama-rṣayaḥ

उपासीनाः प्रपद्यन्ते
and reach perfection?
upāsīnāḥ prapadyante

संसिद्धिं तद्वदस्व मे ॥३॥
Please tell me.
saṃsiddhiṃ tad vadasva me

गूढश्चरसि भूतात्मा
You move about, hidden in all beings.
gūḍhaś carasi bhūtātmā

भूतानां भूतभावन ।
O Creator of the universe,
bhūtānāṃ bhūta-bhāvana

न त्वां पश्यन्ति भूतानि
ignorant beings do not perceive You
na tvāṃ paśyanti bhūtāni

पश्यन्तं मोहितानि ते ॥४॥
who perceives all.
paśyantaṃ mohitāni te

याः काश्च भूमौ दिवि वै रसायां
On earth, in heaven, hell and all directions,
yāḥ kāś ca bhūmau divi vai rasāyāṃ

विभूतयो दिक्षु महाविभूते ।
O Lord, Your glories
vibhūtayo dikṣu mahāvibhūte

ता मह्यमाख्याह्यनुभावितास्ते
are manifested. Please tell them to me.
tā mahyam ākhyāhy anubhāvitās te

नमामि ते तीर्थपदाङ्घ्रिपद्मम् ॥५॥
I bow to Your holy lotus feet.
namāmi te tirtha-padāṅghri-padmam

श्रीभगवानुवाच
The Blessed Lord said,
śrī-bhagavān uvāca

एवमेतदहं पृष्टः
I was asked this very
evam etad ahaṃ pṛṣṭaḥ

प्रश्नं प्रश्नविदां वर ।
question, O Uddhava,
praśnaṃ praśnavidāṃ vara

युयुत्सुना विनशने
at Kurukshetra
yuyutsunā vinaśane

सपत्नैरर्जुनेन वै ॥६॥
by Arjuna, ready to fight his opponents.
sapatnair arjunena vai

ज्ञात्वा ज्ञातिवधं गर्ह्यम्
Knowing that killing relatives is terrible
jñātvā jñāti-vadhaṃ garhyam

अधर्मं राज्यहेतुकम् ।
adharma when done to win a kingdom,
adharmaṃ rājya-hetukam

ततो निवृत्तो हन्ताहं
he therefore withdrew. "I am the killer.
tato nivṛtto hantāhaṃ

हतोऽयमिति लौकिकः ॥७॥
They will be slain," he thought.
hato 'yam iti laukikaḥ

स तदा पुरुषव्याघ्रो
Then Arjuna, the mighty,
sa tadā puruṣa-vyāghro

युक्त्या मे प्रतिबोधितः ।
enlightened by My teachings,
yuktyā me pratibodhitaḥ

अभ्यभाषत मामेवं
asked Me the same question
abhyabhāṣata mām evaṃ

यथा त्वं रणमूर्धनि ॥८॥
as you, at the start of the war.
yathā tvaṃ raṇa-mūrdhani

अहमात्मोद्धवामीषां
O Uddhava, I am the Self of these
aham ātmoddhavāmīṣāṃ

भूतानां सुहृदीश्वरः ।
beings, their friend and Lord.
bhūtānāṃ suhṛd īśvaraḥ

अहं सर्वाणि भूतानि
I am (manifest as) all beings, causing
ahaṃ sarvāṇi bhūtāni

तेषां स्थित्युद्भवाप्ययः ॥९॥
their sustenance, birth and death.
teṣāṃ sthity-udbhav-āpyayaḥ

अहं गतिर्गतिमतां
I am the motion of the moving.
ahaṃ gatir gatimatāṃ

कालः कलयतामहम् ।
I am the destiny of conquerors.
kālaḥ kalayatām aham

गुणानां चाप्यहं साम्यं
I am the equilibrium of the gunas.
guṇānāṃ cāpy ahaṃ sāmyaṃ

गुणिन्यौत्पत्तिको गुणः ॥१०॥
I am the gunas inherent in all things.
guṇiny autpattiko guṇaḥ

गुणिनामप्यहं सूत्रं
I am the source of the gunas.
guṇinām apy ahaṃ sūtraṃ

महतां च महानहम् ।
I am greatness of the great.
mahatāṃ ca mahān aham

सूक्ष्माणामप्यहं जीवो
I am the life of the soul.
sūkṣmāṇām apy ahaṃ jīvo

दुर्जयानामहं मनः ॥११॥
I am the mind among all that's unconquerable.
durjayānām ahaṃ manaḥ

हिरण्यगर्भो वेदानां
Among the Vedas, I am brahma.
hiraṇya-garbho vedānāṃ

मन्त्राणां प्रणवस्त्रिवृत् ।
Among mantras, I am the threefold om.
mantrāṇāṃ praṇavas trivṛt

अक्षराणामकारोऽस्मि
Among letters, I am "a."
akṣarāṇām akāro 'smi

पदानि छन्दसामहम् ॥१२॥
Among meters, I am their quarters.
padāni chandasām aham

इन्द्रोऽहं सर्वदेवानां
Among all gods, I am Indra.
indro 'haṃ sarva-devānāṃ

वसूनामस्मि हव्यवाट् ।
Among the Vasus, I am Agni.
vasūnām asmi havyavāṭ

आदित्यानामहं विष्णू
Among the Adityas, I am Vishnu.
ādityānām ahaṃ viṣṇū

रुद्राणां नीललोहितः ॥१३॥
Among the Rudras, I am Shiva.
rudrāṇāṃ nīlalohitaḥ

ब्रह्मर्षीणां भृगुरहं
Among saintly rishis, I am Bhrigu.
**brahmarṣīṇāṃ bhṛgur ahaṃ**

राजर्षीणामहं मनुः ।
Among kingly rishis, I am Manu.
**rājarṣīṇām ahaṃ manuḥ**

देवर्षीणां नारदोऽहं
Among divine rishis, I am Narada.
**devarṣīṇāṃ nārado 'haṃ**

हविर्धान्यस्मि धेनुषु ॥१४॥
Among cows, I am Kamadhenu.
**havir-dhāny asmi dhenuṣu**

सिद्धेश्वराणां कपिलः
Among perfected saints, I am Kapila.
**siddheśvarāṇāṃ kapilaḥ**

सुपर्णोऽहं पतत्रिणाम् ।
Among birds, I am Garuda.
**suparṇo 'haṃ patatriṇām**

प्रजापतीनां दक्षोऽहं
Among progenitors, I am Daksha.
**prajāpatīnāṃ dakṣo 'haṃ**

पितॄणामहमर्यमा ॥१५॥
Among ancestors, I am Aryama.
**pitṝṇām aham aryamā**

मां विद्ध्युद्धव दैत्यानां
O Uddhava, among the Daityas, know Me as
**māṃ viddhy uddhava daityānāṃ**

प्रह्लादमसुरेश्वरम् ।
Prahlada, the Lord of asuras.
**prahlādam asureśvaram**

सोमं नक्षत्रौषधीनां
Among stars and herbs, I am the moon.
**somaṃ nakṣatrauṣadhīnāṃ**

धनेशं यक्षरक्षसाम् ॥१६॥
Among the demigods, I am Kubera.
**dhaneśaṃ yakṣa-rakṣasām**

ऐरावतं गजेन्द्राणां
Among great elephants, I am Airavata.
**airāvataṃ gajendrāṇāṃ**

यादसां वरुणं प्रभुम् ।
Among water-dwellers, I am Lord Varuna.
**yādasāṃ varuṇaṃ prabhum**

तपतां द्युमतां सूर्यं
Among sources of heat and light, I am the sun.
**tapatāṃ dyumatāṃ sūryaṃ**

मनुष्याणां च भूपतिम् ॥१७॥
Among people, I am the king.
**manuṣyāṇāṃ ca bhūpatim**

उच्चैःश्रवास्तुरङ्गाणां
Among horses, I am Ucchaishravas.
uccaiḥśravās turaṅgāṇāṃ

धातूनामस्मि काञ्चनम् ।
Among metals, I am gold.
dhātūnām asmi kāñcanam

यमः संयमतां चाहं
Among rulers, I am Yama.
yamaḥ saṃyamatāṃ cāhaṃ

सर्पाणामस्मि वासुकिः ॥१८॥
Among snakes, I am Vasuki.
sarpāṇām asmi vāsukiḥ

नागेन्द्राणामनन्तोऽहं
Among serpents, I am Ananta.
nāgendrāṇām ananto 'haṃ

मृगेन्द्रः शृङ्गिदंष्ट्रिणाम् ।
Among horned and fanged animals, I am the lion.
mṛgendraḥ śṛṅgi-daṃṣṭriṇām

आश्रमाणामहं तुर्यो
Of stages of life, I am sannyasa.
āśramāṇām ahaṃ turyo

वर्णानां प्रथमोऽनघ ॥१९॥
Among the castes, I am the brahmanas, O Uddhava.
varṇānāṃ prathamo 'nagha

तीर्थानां स्रोतसां गङ्गा
Among holy rivers, I am the Ganga.
tīrthānāṃ srotasāṃ gaṅgā

समुद्रः सरसामहम् ।
Among bodies of water, I am the sea.
samudraḥ sarasām aham

आयुधानां धनुरहं
Among weapons, I am the bow.
āyudhānāṃ dhanur ahaṃ

त्रिपुरघ्नो धनुष्मताम् ॥२०॥
Among archers, I am Shiva.
tripuraghno dhanuṣmatām

धिष्ण्यानामस्म्यहं मेरुर्
Among abodes, I am Meru.
dhiṣṇyānām asmy ahaṃ merur

गहनानां हिमालयः ।
Among the inaccessible, I am the Himalayas.
gahanānāṃ himālayaḥ

वनस्पतीनामश्वत्थ
Among trees, I am the banyan.
vanaspatīnām aśvattha

ओषधीनामहं यवः ॥२१॥
Among plants, I am the grain-bearing.
oṣadhīnām ahaṃ yavaḥ

पुरोधसां वसिष्ठोऽहं
Among priests, I am Vasishtha.
purodhasāṃ vasiṣṭho 'haṃ

ब्रह्मिष्ठानां बृहस्पतिः ।
Among knowers of brahman, I am Brihaspati.
brahmiṣṭhānāṃ bṛhaspatiḥ

स्कन्दोऽहं सर्वसेनान्याम्
Among all generals, I am Skanda.
skando'haṃ sarvasenānyām

अग्रण्यां भगवानजः ॥२२॥
Among forerunners, I am Lord Brahma.
agraṇyāṃ bhagavān ajaḥ

यज्ञानां ब्रह्मयज्ञोऽहं
Among sacrifices, I am Vedic recitation.
yajñānāṃ brahma-yajño 'haṃ

व्रतानामविहिंसनम् ।
Among vows, I am ahimsa.
vratānām avihiṃsanam

वाय्वग्न्यर्काम्बुवागात्मा
I am wind, fire, sun, water and speech,
vāyv-agny-arkāmbu-vāg-ātmā

शुचीनामप्यहं शुचिः ॥२३॥
among the purifying.
śucīnām apy ahaṃ śuciḥ

योगानामात्मसंरोधो
Among kinds of yoga, I am self-control.
yogānām ātma-saṃrodho

मन्त्रोऽस्मि विजिगीषताम् ।
Among seekers of victory, I am advice.
mantro 'smi vijigīṣatām

आन्वीक्षिकी कौशलानां
Among skills, I am inquiry.
ānvīkṣikī kauśalānāṃ

विकल्पः ख्यातिवादिनाम् ॥२४॥
Among philosophers, I am dispute.
vikalpaḥ khyāti-vādinām

स्त्रीणां तु शतरूपाहं
Among women, I am Manu's wife.
strīṇāṃ tu śatarūpāhaṃ

पुंसां स्वायम्भुवो मनुः ।
Among men, I am Manu.
puṃsāṃ svāyam-bhuvo manuḥ

नारायणो मुनीनां च
Among saints, I am Narayana.
nārāyaṇo munīnāṃ ca

कुमारो ब्रह्मचारिणाम् ॥२५॥
Among celibates, I am Sanatkumara.
kumāro brahmacāriṇām

धर्माणामस्मि सन्न्यासः
**Among religions, I am sannyasa.**
**dharmāṇām asmi sannyāsaḥ**

क्षेमाणामबहिर्मतिः ।
**Among protectors, I am introspection.**
**kṣemāṇām abahir-matiḥ**

गुह्यानां सूनृतं मौनं
**Among secrets, I am silence.**
**guhyānāṃ sūnṛtaṃ maunaṃ**

मिथुनानामजस्त्वहम् ॥२६॥
**Among couples, I am Brahma.**
**mithunānām ajas tv aham**

संवत्सरोऽस्म्यनिमिषां
**Among the continuous, I am the year.**
**saṃvatsaro 'smy animiṣāṃ**

ऋतूनां मधुमाधवौ ।
**Among seasons, I am spring.**
**ṛtūnāṃ madhu-mādhavau**

मासानां मार्गशीर्षोऽहं
**Among months, I am Margashirsha.**
**māsānāṃ mārgaśīrṣo 'haṃ**

नक्षत्राणां तथाभिजित् ॥२७॥
**Among stars, I am Abhijit.**
**nakṣatrāṇāṃ tathābhijit**

अहं युगानां च कृतं
**Among yugas, I am the satya.**
**ahaṃ yugānāṃ ca kṛtaṃ**

धीराणां देवलोऽसितः ।
**Among sages, I am Devala and Asita.**
**dhīrāṇāṃ devalo 'sitaḥ**

द्वैपायनोऽस्मि व्यासानां
**Among editors, I am Veda Vyasa.**
**dvaipāyano 'smi vyāsānāṃ**

कवीनां काव्य आत्मवान् ॥२८॥
**Among poets, I am Shukracharya, the wise.**
**kavīnāṃ kāvya ātmavān**

वासुदेवो भगवतां
**Among the holy, I am Krishna.**
**vāsudevo bhagavatāṃ**

त्वं तु भागवतेष्वहम् ।
**Among devotees, I am you.**
**tvaṃ tu bhāgavateṣv aham**

किम्पुरुषाणां हनुमान्
**Among the Kimpurushas, I am Hanuman.**
**kimpuruṣāṇāṃ hanumān**

विद्याध्राणां सुदर्शनः ॥२९॥
**Among the Vidyadharas, I am Sudarshana.**
**vidyādhrāṇāṃ sudarśanaḥ**

रत्नानां पद्मरागोऽस्मि
Among jewels, I am the ruby.
ratnānāṃ padma-rāgo 'smi

पद्मकोशः सुपेशसाम् ।
Among the tender, I am the lotus.
padma-kośaḥ supeśasām

कुशोऽस्मि दर्भजातीनां
Among grasses, I am kusha grass.
kuśo 'smi darbha-jātīnāṃ

गव्यमाज्यं हविःष्वहम् ॥३०॥
Among offerings, I am ghee.
gavyam ājyaṃ haviḥṣv aham

व्यवसायिनामहं लक्ष्मीः
I am the good fortune of the industrious.
vyavasāyinām ahaṃ lakṣmīḥ

कितवानां छलग्रहः ।
I am the fraud of the deceitful.
kitavānāṃ chala-grahaḥ

तितिक्षास्मि तितिक्षूणां
I am the forgiveness of the forgiving.
titikṣāsmi titikṣūṇāṃ

सत्त्वं सत्त्ववतामहम् ॥३१॥
I am goodness of the good.
sattvaṃ sattvavatām aham

ओजः सहो बलवतां
I am the energy of the mighty.
ojaḥ saho balavatāṃ

कर्माहं विद्धि सात्वताम् ।
I am the worship of the devout.
karmāhaṃ viddhi sātvatām

सात्वतां नवमूर्तीनाम्
Among the nine forms worshiped by devotees,
sātvatāṃ nava-mūrtīnām

आदिमूर्तिरहं परा ॥३२॥
I am the supreme, foremost form.
ādi-mūrtir ahaṃ parā

विश्वावसुः पूर्वचित्तिर्
I am Vishvavasu vand Purvachitti
viśvāvasuḥ pūrvacittir

गन्धर्वाप्सरसामहम्।
among the gandharvas and apsaras.
gandharvāpsarasām aham

भूधराणामहं स्थैर्यं
I am the stability of mountains
bhū-dharāṇām ahaṃ sthairyaṃ

गन्धमात्रमहं भुवः ॥३३॥
and the smell of earth.
gandha-mātram ahaṃ bhuvaḥ

अपां रसश्च परमस्
I am the sweet taste of water.
apāṃ rasaś ca paramas

तेजिष्ठानां विभावसुः ।
Among the shining, I am the sun.
tejiṣṭhānāṃ vibhāvasuḥ

प्रभा सूर्येन्दुताराणां
I am the light of the sun, moon, and stars.
prabhā sūryendu-tārāṇāṃ

शब्दोऽहं नभसः परः ॥३४॥
I am the vast sound of space.
śabdo 'haṃ nabhasaḥ paraḥ

ब्रह्मण्यानां बलिरहं
Among the holy, I am Bali.
brahmaṇyānāṃ balir ahaṃ

वीराणामहमर्जुनः ।
Among the courageous, I am Arjuna.
vīrāṇām aham arjunaḥ

भूतानां स्थितिरुत्पत्तिर्
For all beings, I am their sustainer, source,
bhūtānāṃ sthitir utpattir

अहं वै प्रतिसङ्क्रमः ॥३५॥
and withdrawer.
ahaṃ vai pratisaṅkramaḥ

गत्युक्त्युत्सर्गोपादानम्
I am the five faculties of action like motion and speech,
gaty-ukty-utsargopādānam

आनन्दस्पर्शलक्षणम् ।
and the five sense organs
ānanda-sparśa-lakṣaṇam

आस्वादश्रुत्यवघ्राणम्
like taste, hearing and smell.
āsvāda-śruty-avaghrāṇam

अहं सर्वेन्द्रियेन्द्रियम् ॥३६॥
I am the sentience of all senses.
ahaṃ sarvendriyendriyam

पृथिवी वायुराकाश
I am earth, wind, space,
pṛthivī vāyur ākāśa

आपो ज्योतिरहं महान् ।
water and fire. I am Mahat.
āpo jyotir ahaṃ mahān

विकारः पुरुषोऽव्यक्तं
I am the modifications, consciousness, and the unmanifest.
vikāraḥ puruṣo 'vyaktaṃ

रजः सत्त्वं तमः परम् ।
I am sattva, rajas, and tamas. I am transcendent.
rajaḥ sattvaṃ tamaḥ param

अहमेतत्प्रसङ्ख्यानं
I am the enumeration,
aham etat prasaṅkhyānaṃ

ज्ञानं तत्त्वविनिश्चयः ॥ ३७॥
knowledge, and realization of them.
jñānaṃ tattva-viniścayaḥ

मयेश्वरेण जीवेन
Without Me, as Ishvara and living beings,
mayeśvareṇa jīvena

गुणेन गुणिना विना ।
as qualities and substances,
guṇena guṇinā vinā

सर्वात्मनापि सर्वेण
as Self of all and their bodies,
sarvātmanāpi sarveṇa

न भावो विद्यते क्वचित् ॥३८॥
nothing at all would exist.
na bhāvo vidyate kvacit

सङ्ख्यानं परमाणूनां
I can count every atom
saṅkhyānaṃ paramāṇūnāṃ

कालेन क्रियते मया ।
over the course of time,
kālena kriyate mayā

न तथा मे विभूतीनां
but not My glories because
na tathā me vibhūtīnāṃ

सृजतोऽण्डानि कोटिशः ॥३९॥
of creating countless universes.
sṛjato 'ṇḍāni koṭiśaḥ

तेजः श्रीः कीर्तिरैश्वर्यं
Brilliance, wealth, fame, power,
tejaḥ śrīḥ kīrtir aiśvaryaṃ

ह्रीस्त्यागः सौभगं भगः ।
humility, renunciation, pleasures, blessings,
hrīs tyāgaḥ saubhagaṃ bhagaḥ

वीर्यं तितिक्षा विज्ञानं
strength, patience, knowledge -
vīryaṃ titikṣā vijñānaṃ

यत्र यत्र स मेंऽशकः ॥४०॥
each of these are aspects of Me.
yatra yatra sa me 'ṃśakaḥ

एतास्ते कीर्तिताः सर्वाः
I have described to you all these
etās te kīrtitāḥ sarvāḥ

सङ्क्षेपेण विभूतयः ।
glories in brief.
saṅkṣepeṇa vibhūtayaḥ

मनोविकारा एवैते
Yet these are merely ideas
mano-vikārā evaite

यथा वाचाभिधीयते ॥४१॥
expressed in words.
yathā vācābhidhīyate

वाचं यच्छ मनो यच्छ
Control your speech. Control your mind.
vācaṃ yaccha mano yaccha

प्राणान् यच्छेद्रियाणि च ।
Control your breath and senses.
prāṇān yacchedriyāṇi ca

आत्मानमात्मना यच्छ
Control yourself by yourself.
ātmānamātmanā yaccha

न भूयः कल्पसेऽध्वने ॥४२॥
Then you will not return to this world again.
na bhūyaḥ kalpase 'dhvane

यो वै वाङ्मनसी संयग्
When speech and mind is not properly
yo vai vāṅ-manasī saṃyag

असंयच्छन् धिया यतिः ।
controlled by the intellect of a monk,
asaṃyacchan dhiyā yatiḥ

तस्य व्रतं तपो दानं
his vows, penances and acts of charity
tasya vrataṃ tapo dānaṃ

स्रवत्यामघटाम्बुवत् ॥४३॥
will leak out like water from an unbaked pot.
sravaty āma-ghaṭāmbuvat

तस्माद्वचो मनः प्राणान्
Therefore, speech, mind and breath
tasmād vaco manaḥ prāṇān

नियच्छेन्मत्परायणः ।
should be controlled by one devoted to Me,
niyacchen mat-parāyaṇaḥ

मद्भक्तियुक्तया बुद्ध्या
endowed with intelligence and devotion.
mad-bhakti-yuktayā buddhyā

ततः परिसमाप्यते ॥४४॥
From that, his life is fulfilled.
tataḥ parisamāpyate